# संस्कृतवार्ता:

**दिनाङ्कः - 01.12.2024** **सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी भुवनेश्वरे आयोजितस्य अखिल-भारतीय-रक्षि-महानिदेशक-महानिरीक्षक-सम्मेलनस्य अन्तिमे दिवसे देशस्य विभिन्नैः राज्यैः केन्द्रशासित-प्रदेशैः च संबद्धेषु महत्त्वपूर्णेषु सुरक्षा-विषयेषु चर्चां करोति।
- तेलङ्गानादेशस्य मुलुगु-जनपदे अद्य प्रातःकाले सैन्यबलैः सह सङ्घर्षे सप्त वामपन्थिनः आतङ्कवादिनः मारिताः।
- नगालैण्डम् अद्य द्विषष्टितमं राज्यदिवसम् आचरति। अस्मिन् अवसरे राष्ट्रपतिः, उपराष्ट्रपतिः प्रधानमन्त्री च राज्यस्य जनेभ्यः शुभकामनां प्रदत्तवन्तः।
- अद्य एड्स-रोगस्य विषये जनान् जागरूकान् कर्तुं विश्व-एड्स-दिवसः आचर्यते।

  अपि च,

- सैयद-मोदी-अन्ताराष्ट्रिय-बैडमिं□न्-स्पर्धा-मालिकायां, महिलैकल-वर्गीयं द्वन्द्वं भारतीय-बैडमिं□न्-तारिकया पी.वी.सिन्धुना जितम्।

---

**प्रधानमन्त्री/रक्षिसम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी भुवनेश्वरे आयोजितस्य अखिल-भारतीय-रक्षि-महानिदेशक-महानिरीक्षक-सम्मेलनस्य अन्तिमे दिवसे देशस्य विभिन्नैः राज्यैः केन्द्रशासित-प्रदेशैः च संबद्धेषु महत्त्वपूर्णेषु सुरक्षा-विषयेषु चर्चां करोति।

ध्यानास्पदम् अस्ति यत् अन्तर्जालीयापराधानां रोधनं, त□ीयसुरक्षां, माओवादोग्रवादस्य उन्मूलनं च अभिलक्ष्य रणनीति-निर्धारणाय एतत् सम्मेलनम् आयोजितम्। अत्र कृत्रिम-बुद्धिमत्तया ड्रोन् सदृश-प्राविधिकीभिश्च उत्पन्नानि समाह्वानानि सम्मुखीकर्तुम्, आतङ्कवादरोधि-रणनीतिं च निर्मातुं रक्षिबलस्य शीर्षाधिकारिभिः विभिन्नैः सुरक्षाभिकरणैः विचारणा भवति। एतद् अतिरिच्य आधारभूत-संरचना-रक्षिसंबद्ध-विभिन्न-परिचालन-मादकपदार्थादि-विषयेषु अपि चर्च्यन्ते। गतवासरे वामपन्थि-नक्सलवाद-समस्याम् अभिलक्ष्य परिचर्चा जाता।

सम्मेलने केन्द्रीय: गृहमन्त्री अमित-शाहः, गृहसचिव: गोविन्द-मोहन: राष्ट्रिय-सुरक्षा-परामर्शद: अजीत-डोभाल: च उपस्थिता: विद्यन्ते।

---------------------------------------------

**तेलङ्गाना-नक्सलवाद:**

तेलङ्गाना-प्रदेशस्य मुलुगु-जनपदे अद्य प्रातःकाले सैन्यबलैः सह सङ्घर्षे सप्त वामपन्थिन: आतङ्कवादिनः मारिताः। एतेषु बीजापुरतः सम्बद्ध: गुल्मप्रमुख: भद्रू उपनामक: पपन्ना, अन्ये द्वे सदस्ये च स्तः। सङ्घर्षात् पूर्वं एते उग्रवादिनः सैन्यबलस्य सूचकत्वं प्रतिपाद्य आदिवासीद्वयं मारितवन्त:। अद्य प्रातःकाले अन्वेषणावधौ नक्सलविरोधि-आरक्षकैः एतुरङ्गराम-क्षेत्रे आतङ्कवादिनः गमनागमनं दृष्ट्वा गोलिकावर्षणम् आरब्धम् । ए.के.-सप्तचत्वारिंशत्-भुशुण्डिकाद्वयम् अपि आरक्षकैः प्राप्तम् ।

---------------------------------------------

**नगालैण्डम्**

नगालैण्डम् अद्य द्विषष्टितमं राज्यदिवसम् आचरति। त्रिषष्ट्यधिकोनविंशति शततमे वर्षे अस्मिन् दिने नगालैण्डं भारतस्य षोडशतमं राज्यं जातम्। अद्य नगालैण्डस्य कोहिमा-नगरे राज्यस्तरीयानां कार्यक्रमाणाम् आयोजनं सञ्जातम्। यस्मिन् मुख्यमन्त्रिणा नेफ्यू रियो सभां सम्बोधितवान् । अस्मिन् अवसरे मुख्यमन्त्री राज्ये शासनस्य शिक्षायाः च उन्नयनार्थम् अनेकाः उपक्रमाः प्रारब्धाः। राज्यदिवसं समेत्य हार्नबिल्-महोत्सवस्य पञ्चविंशतितमं संस्करणम् अद्य सायं किसामानगरस्य नागा हेरिटेज विलेज इति स्थाने आरब्धं भविष्यति। अस्मिन् अवसरे राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च राज्यस्य जनेभ्यः शुभकामनां प्रदत्तवन्तः। राष्ट्रपतिः द्रौपदी मुर्मू: अन्तर्जालीय-पटल-संदेश-माध्यमेन प्रोक्तवती यत् वनस्पतिभिः जन्तुभिः इत्यादिभिः च समृद्धं सम्पन्नं सुन्दरं नगालैण्ड-राज्यं वीर-भूमिः अपि अस्ति। सा राज्यस्य जनेभ्यः शान्तिपूर्णं, समृद्धं प्रगतिशीलं च भविष्यम् अभिलक्ष्य शुभकामनां प्रदत्तवती। उपराष्ट्रपतिः जगदीप-धनखड़ः नगालैण्डस्य प्राकृतिकवैभवं संस्कृतिं च प्रकृत्या सह गहनसौहार्दं यथार्थतया प्रकाशितवान्। प्रधानमन्त्री नरेन्द्रमोदी नगालैण्डस्य समृद्धसंस्कृतेः राज्यस्य जनानां अद्भुतस्वभावस्य च प्रशंसां कृतवान्।

---------------------------------------------

**विश्व-एड्स-दिवसः**

अद्य एड्स-रोगस्य विषये जनान् जागरूकान् कर्तुं विश्व-एड्स-दिवसः आचर्यते। अस्य विषयः अस्ति - 'टेक द राइट्स पाथ' इति अर्थात् अधिकाराणां मार्गं प्रति गच्छ। अद्य मध्यप्रदेशस्य इन्दौरनगरे विश्वएड्सदिवसस्य अवसरे केन्द्रीयस्वास्थ्यमन्त्री जगतप्रकाशनड्डा एच.आई.वी. इत्यनेन संक्रमणेन ग्रस्तान् जनान् प्रति संवेदनशीलतां व्यवहर्तुं अथ च तेषां मानवाधिकारान् संरक्षयितुं जनान् अध्यर्थिवान्।

श्रीनड्डा अवदत् यत् सप्तदशाधिकद्विसहस्रतमवर्षस्य एच.आई.वी. संरक्षणविधि-माध्यमेन संक्रमितानां विरुद्धं किमपि भेदभावं निवारयितुं केन्द्रसर्वकारेण कार्यं विहितम् अस्ति। सः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य नेतृत्वे सर्वकारेण परीक्षणस्य

चिकित्सायाश्च नीतिः कार्यान्विता जाता। श्रीनड्डा इत्यनेन उक्तं यत् भारतम् अस्य रोगस्य प्रभाविनम् औषधं निर्मातुं सफलं जातम्। त्रिंशदधिकद्विसहस्रतमं वर्षं यावत्  भारतम् अस्मात् रोगात् मुक्तं भविष्यति इति स्वास्थ्यमन्त्री आशां प्रकटितवान् ।

---

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in  इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

---

**राजस्थानम्/विधेयकम्**

राजस्थान-मन्त्रिमण्डलेन बलात् धर्मपरिवर्तनं रोद्धुं विधेयक प्राग्रूपं स्वीकृतम्। आगामिनि विधानसभासत्रे 'चतुर्विंशत्यधिक-द्विसहस्रतमवर्षीयं राजस्थान-विध्यसंगत-धर्मपरिवर्तन-निषेध-विधेयकं' प्रस्तोष्यते।

---

**सीमासुरक्षाबलम्**

अद्य सीमासुरक्षाबल-बीएसएफ इत्यस्य स्थापनादिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी शुभकामनां प्रदत्तवान्। सः अवदत् यत् देशस्य सुरक्षाक्षेत्रे  बीएसएफ इत्यस्य  महत्त्वपूर्णं योगदानम् अस्ति।  एतत् बलं साहसस्य, समर्पणस्य असामान्यसेवायाः च प्रतीकम् अस्ति । श्रीमोदी राष्ट्रस्य सुरक्षार्थं  बीएसएफ इत्यस्य  समवधानतायाः साहसस्य च प्रशंसाम् अकरोत् ।

---

**बैडमिंटन्**

सैयद-मोदी-अन्ताराष्ट्रिय-बैडमिंटन्-स्पर्धा-मालिकायां, महिलैकल-वर्गीयं द्वन्द्वं भारतीय-बैडमिंटन्-तारिकया पी.वी.सिन्धुना जितम्। लखनऊ-नगरे, अद्य महिलानाम् एकल-वर्गीय-स्पर्धा-शृङ्खलाया: निर्णायके चक्रे पी.वी.सिन्धु: चीनदेशीयां प्रतिद्वन्द्विनीं वु-लुओ-यू-इत्येताम् एकविंशति-चतुर्दश, एकविंशति-षोडश इत्येतै: अङ्कान्तरालै: पराजितवती।

अपरत:, अद्यैव पुरुषाणाम् एकलवर्गे निर्णायकचक्रे भारतस्य लक्ष्यसेन: सिंगापुर-देशीयं जिया-हेंग-जेसन-तेहम् एकविंशति: षट्, एकविंशति: सप्त इत्येतै: अङ्कान्तरालै: पराजित्य विजयम् अध्यगच्छत्।

इत: पूर्वं, महिलानां युगल-वर्गीयं द्वन्द्वं भारतस्य त्रिशा-जॉली गायत्री गोपीचन्द: च जितवत्यौ। ताभ्यां चीन-देशीये क्रीडिके बाओ ली जिंग:, ली कियान: च पराजिते।

तत्रैव, पुरुष युगल वर्गे भारतस्य पृथ्वी कृष्णमूर्ति रॉय:, के साई प्रतीक: च पराजितौ।

मिश्रित-युगल-वर्गे अपि तनीशा क्रैस्टो ध्रुव कपिलयो: युगलं थाईलैंडस्य डेचापोल-पुवारानुक्रोह सुपिस्सारा-पेवसम्प्रानयो: युगलेन पराजितम्।

।।इति वार्ता:।।